दिनाङ्क :- 26.04.2026

प्रात: - 06:55

<u>पश्चिम-बङ्गाल</u>

पश्चिमबङ्गाल-विधानसभानिर्वाचनस्य द्वितीयचरणाय अशेषेऽपि राज्ये प्रचारं तीव्रीभूतम्, यस्मिन् विभिन्नराजनैतिकदलानां मुख्यप्रचारका: जनसभानां मार्गप्रदर्शनानां सार्वजनिकोपवेशनानां च माध्यमेन मतदातृन् आक्रष्टुं प्रयासं कुर्वन्ति। भाजपादलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य दलस्य प्रत्याशिनां समर्थने नैका: जनसभा: सम्बोधयिष्यति। ह्य: पूर्वी-बर्धमानस्य जमालपुरे एकां जनसभां सम्बोधयन् अमितशाह: उक्तवान् यत् यदि तस्य दलं शासने आगमिष्यति तर्हि समान-नागरिक-संहितां सप्तमं वेतनायोगं च प्रवर्तयिष्येते। असौ महिलाभ्य: नि:शुल्क-बसयानयात्रायै अपि आश्वासितवान्। सहैव मतुआ-समुदायाय स्वीय-दलस्य समर्थनं पुनरुद्धाटितवान्।

तृणमूल-काङ्ग्रेस-दलस्य वरिष्ठनेता ममता बनर्जी अभिषेक-बनर्जी च दलस्य विधि-सम्बद्ध-युद्धविषये संसूचितवन्तौ, यत् द्वात्रिंशत्-लक्षनामानि मतदातृ-सूचौ पुन:स्थापितानि अथ जनान् आश्वासितवन्तौ यत् बहिष्करणविषये चिन्ताया: आवश्यकता न वर्तते। काङ्ग्रेसदलस्य वरिष्ठनेता राहुल-गान्धी उक्तवान् यत् तस्य दलं यत्र संविधानम् एकतां च प्रति बद्धम् अस्ति तत्रैव भाजपादलं द्वेषस्य विभाजनस्य च राजनीतिं करोतीति।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वाह्णे एकादशवादने स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदं त्रयस्त्रिंशदधिकैक-तमं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी, दूरदर्शनं, प्रधानमन्त्री-कार्यालयः, सूचनाप्रसारणमन्त्रालयः इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अनुक्षणम् अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते।

## पीएम-नीति आयोग

प्रशासनेन नीत्यायोगः पुनर्निर्मितः। अर्थशास्त्रज्ञः अशोककुमारलाहिड़ी आयोगस्य उपाध्यक्षत्वेन नियुक्तः अस्ति। असौ वर्तमान-उपाध्यक्षस्य सुमन-के.बेरी इत्येतस्य स्थाने आगमिष्यति। लाहिड़ी-वर्येण सहैव प्रशासनेन राजीव-गौबा, प्रो. के.वी. राजू, प्रो. गोवर्धन-दासः, डॉ. एम. श्रीनिवासः, प्रो. अभय-करन्दीकरः च नीत्यायोगस्य पूर्णकालिक-सदस्यत्वेन नियुक्ताः। सामाजिक-सञ्चार-पटले एकस्मिन् सन्देशे प्रधानमन्त्री नरेन्द्रमोदी कथितवान् यत् नीत्यायोगः भारतस्य नीति-निर्माण-संरचनायां महत्त्वपूर्ण-स्तम्भरूपेण उद्भूतः अस्ति। प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् यत् नीत्यायोगः सर्वेषु क्षेत्रेषु नवाचाराय दीघकालिक-रणनीतिकविचाराय च गतिशील-मञ्चरूपेण कार्यं करोति।

मनोहरलाल

केन्द्रीयावास-नगर-प्रकरणानां मन्त्री मनोहर-लालः उक्तवान् यत् प्रशासनं नगरीयाह्वानकोषस्य अन्तर्गतम् आगामि-चतुर्वर्षेषु नगराणां विकासाय एकलक्षकोटिरूप्यकाणां व्ययं करिष्यति।